अथ वर्षासु पथ्यम् ।

लवणम् । अम्लम् । मिष्टम् । सारम् । प्रियम् । स्निग्धम् । गुरु । उष्णम् । बल्यम् । अभ्यङ्गः । उद्वर्त्तनम् । अग्निसेवा । तप्तान्नपानम् । दधि ॥

वर्षास्वपथ्यम् ।

पूर्व्वपवनः । दृष्टिः । घर्म्मः । हिमः । श्रमः । नदीनीरम् । दिवास्वप्नः । रूक्षम । नित्यमैथुनम् ॥ * ॥

शरदि पथ्यम् ।

शीतरसाम्बुपानम् । तरुच्छाया । चन्दनम् । इन्दुसेवा । सिता । मुद्गः । मधुरम् । गव्यदुग्धम् । इक्षुः । शाल्योदनम् ॥ * ॥

शरदपथ्यम् ।

लवणम् । अम्लम् । तीक्ष्णम् । कटु । पिष्टम् । अतसी । विदाहि । सुरा । नालम् । दधि । तक्रम् । तैलम् । क्रोधः । उपवासः । आतपः । मैथुनम् ॥ * ॥

अथ हिमर्त्तौ पथ्यम् ।

तप्तजलम् । उपनाहः । पयः । अन्नम् । पानम् । घृतम् । स्त्रीसेवा । वह्निसेवा । गुरूणि । यथेष्टभुक्तम् ॥ * ॥

हिमर्त्तावपथ्यम् ।

दिवानिद्रा । कुभोजनम् । अभोजनम् । लङ्घनम् । पुरातनान्नम् । लघुपाकि । शैत्यम् । वार्य्योदनम् । शीतजलावगाहः ॥ * ॥

शिशिरे पथ्यम् ।

स्त्री । वाह्निसेवा । मत्स्यः । अजमांसम् । दधि । दुग्धम् । सर्पिः ॥ * ॥

शिशिरेऽपथ्यम् ।

तीक्ष्णोष्णकट्वम्लकषायतिक्तानि । वासुदकम् । आर्द्रभोजनम् । दिवानिद्रा । चन्दनम् । चन्द्रसेवा । शीतजलस्नानादि ॥ * ॥

माघे विशेषो यथा ।

माघे च शीतद्रवमिष्टपिष्टं
कन्दः कटुत्वा गुरुशालिभक्तम् ।

इति षड्ऋतुपथ्यापथ्याधिकारः ॥ * ॥

आगन्तुकज्वराणां पथ्यापथ्यं ज्वराधिकारे
न लिखितमतोऽत्र लिख्यते ।

"अभिघातसमुत्थाने पानाभ्यङ्गौ च सर्पिषः ।
क्षतजे व्रणजे चापि क्षतव्रणचिकित्सितम् ॥
ओषधीगन्धविषजे विषपित्तप्रसाधनम् ।
अभिचाराभिशापोत्थे जपहोमादिभेषजम् ॥
उत्पातग्रहपीड़ोत्थे दानस्वस्त्ययनादयः ।
क्रोधोत्थिते पित्तहरं कामजे कामजित्क्रिया ॥
कामशोकभयोद्भूते सर्व्वा वातहरी क्रिया ।
आश्वासनेष्टलाभो हर्षदायीनि यानि च ॥
विशेषतः पुनश्चाच कामक्रोधसमुत्थिते ।
भयशोकसमुद्भूते कामक्रोधोक्तमौषधम् ॥
भूताभिषङ्गजे भूतबन्धावेशनताड़नम् ।
मनःक्षोभसमुत्पन्ने मनसः सान्त्वनानि च ॥
इत्यागन्तुज्वरे पूर्व्वैर्भिषग्भिः पथ्यमिष्यते ।
विष्णोर्नामसहस्रस्य पाठनं श्रवणं श्रुतिः ॥
देवानां ब्राह्मणानाञ्च गुरूणामपि पूजनम् ।
ब्रह्मचर्य्यं तपो होमः प्रदानं नियमो जपः ॥
साधूनां दर्शनं सत्यं रत्नौषधिविधारणम् ।
मङ्गलाचरणञ्चेति वर्गः सर्व्वान् ज्वरान् जयेत् ॥"

आगन्तुकज्वरे अपथ्यम् ।

"अधिवासनकर्म्माणि रक्तस्रग्वस्त्रधारणम् ।
वसिष्ठं दन्तकाष्ठमसात्म्यमपि भोजनम् ॥
विरुद्धान्यन्नपानानि विदाहीनि गुरूणि च ।
दुष्टाम्बुक्षारमद्यानि पत्रशाकं विरूढ़कम् ॥
नलदाम्बु च ताम्बूलं कलिङ्गं लकुचं फलम् ।
आड़ीमत्स्यञ्च पिण्याकं कृत्वाकं पिष्टवेष्टतम् ॥
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्ज्जयेत् ॥"

इति पथ्यापथ्यविनिश्चयः समाप्तः ॥

पद, स्थैर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) पदति । इति दुर्गादासः ॥

पद, त् क ङ गतौ । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-आत्मं-सकं-सेट् ।) क ङ, पदयते । इति दुर्गादासः ॥

पद, य ङ औ गत्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) य ङ, पद्यते । औ, पत्ता । इति दुर्गादासः ॥

पदं, क्ली, (पद + 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।' ३ । १ । १३४ । इति अच् ।) व्यवसायः । त्राणम् । स्थानम् । (यथा, मनुः । १२ । १२५ ।
"एवं यः सर्व्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥")
चिह्नम् । पादः । वस्तु । इत्यमरः । ३ । ३ । ६३ ॥ शब्दः । वाक्यम् । प्रदेशः । पादचिह्नम् । श्लोकपादः । (यथा, रामायणे । १ । २ । १८ ।
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥")
किरणे पुं । इति मेदिनी ॥ पदलक्षणं यथा,—
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।"
इति साहित्यदर्पणे । २ । ४ ॥

श्रीकृष्णपदचिह्नं यथा,—
"सौवर्णीं राजतीं वापि पाषाणनिर्म्मितामपि ।
पादयोश्चाङ्कितां कृत्वा पूजाञ्चैव समाचरेत् ॥
दक्षिणस्य पदाङ्गुष्ठमूले चक्रं बिभर्त्त्यजः ।
तत्र नम्रजनस्योग्रसंसारच्छेदनाय सः ॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः ।
धातुश्चित्तद्विरेफाणां लोभमायाति शोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम् ।
कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तेभवशकारणम् ।
भोगसम्पन्मयं धत्ते यवमङ्गुष्ठपर्व्वणि ।
तथा वामाङ्गुष्ठमूले पाञ्चजन्यस्य लक्षणम् ।
सर्व्वविद्याप्रकाशाय धत्ते च भगवानजः ॥"
इति पाद्मे पातालखण्डे १२ अध्यायः ॥

पदकः, पुं, पदं वेत्ति यः ("क्रमादिभ्यो वुन् ।" ४ । २ । ६१ । इति वुन् ।) पदज्ञाता । इति व्याकरणम् ॥ (यथा, राजतरङ्गिण्याम् । ५ । ४६ ।
"रामजाख्यमुपाध्यायं ख्यातव्याकरणश्रमम् ।
व्याख्यात्पदकश्चक्रे स तस्मिन् सुरमन्दिरे ॥")
स्वनामख्यातकण्ठभूषणञ्च । देवपदचिह्नादियुक्तत्वात् ॥ (पदमेव इति स्वार्थे के कृते, क्ली । पदम् । यथा, महाभारते अनुशासनपर्व्वणि ।
"इतःप्रभृति यातव्यं पदकं पदकं शनैः ॥")

पदगः, पुं, (पदाभ्यां गच्छतीति । गम ल्टगतौ + "अन्येभ्योऽपि ।" इति डः ।) पदातिकः । इत्यमरः । २ । ८ । ६६ ॥ पद्भ्यां गमनकर्त्तरि त्रि ॥

पदन्यासः, पुं, ( पदस्य गोपदस्येव न्यासो यत्र । ) गोक्षुरः । रति शब्दचन्द्रिका ॥ पदस्य विन्यासः । यथा, रसमञ्जरी ।
"पदन्यासो गेहाद्बहिरहिफणारोहणसमः
स्वगेहादन्यत् स्याङ्गवनमपरद्वीपतुलितम् ।
वचो लोकालभ्यं कृपणधनतुल्यं स्वगहशः
पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः ॥"
(तन्त्रोक्तान्नपूर्णामन्त्रस्थपदानां तत्तदङ्गेषु न्यासः । यदुक्तं तन्त्रसारज्ञानार्णवे ।
"एकमेकं पुनश्चैकं पुनरेकं द्वयन्ततः ।
चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्व्वति ! ॥
पदान्येतानि देवेशि ! नवद्वारेषु विन्यसेत् ।
मूर्द्धादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने ! ॥
गुह्यादिब्रह्मरन्ध्रान्तं पदानां नवकं न्यसेत् ॥")

पदभञ्जनं, क्ली, ( विभक्तियुक्तानां पदानां भञ्जनं विश्लेषो यत्र । यद्वा, पदानि भज्यन्तेऽनेन । भञ्ज + करणे ल्युट् ।) निरुक्तम् । गूढ़ार्थशब्दव्याख्या । इति हेमचन्द्रः ॥

पदभञ्जिका, स्त्री, (पदानां भञ्जिका विश्लेषिका ।) पञ्जिका । टिप्पनी । इति हेमचन्द्रः ॥

पदमाला, स्त्री, (पदानां माला विस्तृतिर्यस्याम् ।) मोहनशीला विद्या । यथा,—
"पदमालां महाविद्यां सर्व्वदेवनमस्कृताम् ।
याचयामि सुरेशानसुमादेहार्द्धवारिणम् ॥"
इति देवीपुराणे ६ अध्यायः ॥
अस्या विवरणं तत्रैव द्रष्टव्यम् । पदश्रेणी च ॥

पदविः, स्त्री, ( पद्यते गम्यतेऽनया । पद गतौ + "पद्यटिभ्यामविः ।" इति अविः ।) पद्धतिः । पन्थाः । इत्यमरः । २ । १ । १५ ॥

पदवी, स्त्री, (पदवि + "कृदिकारादक्तिनः ।" इति पक्षे ङीष् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, रघुः । ७ । ७ ।
"उत्स्रष्टलीलागतिरागवाचा-
दलक्तकाङ्कां पदवीं ततान ॥"
पद्धतिः । यथा, तत्रैव । ३ । ५० ।
"अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः ॥"
पदम् । यथा, पञ्चतन्त्रे । १ । २५८ । "अथ तेन सिंहाय अमात्यपदवी प्रदत्ता व्याघ्राय शय्यापालत्वमिति ॥")

पदष्ठीवं, क्ली, (पादौ च अष्ठीवन्तौ च तयोः समाहारः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति